श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कोडुङ्गल्लूर् कुन्हिकुट्टन् तम्पुरन् विरचितम्

# ॥ श्री गुरुवायुपुरेशभुजङ्गस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुवायुपुरेशभुजङ्गस्तोत्रम् ॥

मरुन्मन्दिरावासमंगल्यमूर्ते
    जगन्नाथ गोविन्द विष्णो मुरारे।
भवद्भक्तिरन्तः स्फुरन्ती नराणां
    परानन्दपीयूषयूषं ददाति ॥ 1 ॥

इयं भक्तिरेका त्वहो कामधेनु -
    श्चतुर्धा विभज्यानुगृह्णाति लोकान्।
यया पायितास्त्वत्परप्रेमदुग्धं
    मनुष्याः पुनर्देवभूयं लभन्ते ॥ 2 ॥

जगत्यार्तलोकैस्तथार्थार्थिभिर्वा
    विजिज्ञासुभिर्ज्ञानिभिश्चाच्युतस्त्वम्।
चतुर्धा जनैर्नित्यमाराध्यसेऽन्त -
    र्भवन्तं नृणां भावयत्येव भक्तिः ॥ 3 ॥

ननु प्रत्यहं वातरोगातुराङ्गा -
    स्तथान्ये जना वायुगेहेश विष्णो।
भवन्तं भजन्तो लभन्ते किलान्ते
    स्वरोगाच्च संसारयोगाच्च मुक्तिम् ॥ 4 ॥

कविर्भट्टनारायणोऽग्रे भजंस्त्वां
    मरुन्नाथ निर्माय नारायणीयम्।

विरुग्णः कलावायुरारोग्यसौख्यं
प्रपेदे किलान्ते च संसारमुक्तिम् ॥ 5 ॥

चलच्चन्द्रकोन्नद्धकेशं विराज -
न्मणीकुण्डलोद्भासिगण्डप्रदेशम् ।
स्मितार्द्रं सिताक्षं मुखं सन्मुखं ते
भजन्तो रुजं रोगिणो विस्मरन्ति ॥ 6 ॥

श्रिया कौस्तुभेनापि वत्सेन हार -
श्रिया चाश्रितोदारदोरन्तरालम् ।
गदाशङ्खचक्राब्जहस्तं वपुस्ते
भजन्तोऽर्थमर्थार्थिनोऽर्थ्यं लभन्ते ॥ 7 ॥

नवाश्वत्थपत्रोपमाल्पोदरान्त -
र्निविष्टोरुविश्वाण्डषण्डं त्वदङ्गम् ।
स्फुरत्पीतकौशेयमन्तश्चिरन्त -
द्विचिन्त्यैव जिज्ञासवोऽन्ते स्मयन्ते ॥ 8 ॥

नमद्देवदैत्यर्षिशीर्षैः प्रमृष्टं
समस्तागमश्रौतशीर्षे निविष्टम् ।
समं ज्ञानिनो युग्मरूपं पदं ते
समन्तात् समालोक्य हृष्यन्ति सिद्धाः ॥ 9 ॥

घनश्यामलं कोमलं ते स्वरूपं
मनः कल्पितं भावयन्तो हि भक्ताः ।
पुरो वीक्ष्य भूयो नमन्तस्तुवन्त -
श्चिरोद्दिष्टमानन्दमाम्रेडयन्ति ॥ 10 ॥

हरे ! कृष्ण ! वातालयेशाच्युत ! त्वां
परेऽपि स्मरन्त्येव मध्यस्थिताश्च ।

चिरेणात्तभक्तिप्रसङ्गा पुनः किं
परेणेदृशी ते महिम्नां समृद्धिः ॥ **11** ॥

भवक्लेशदासारिषड्वर्गबाधा -
भवद्योजिता चेत् परा योगविद्या।
तथा ह्याश्रितास्त्वद्गतां लोकयात्रा -
मनेके जनाश्शाश्वतीं सिद्धिमापुः ॥ **12** ॥

शिशुप्रीणनं दुग्धचौर्यादिवृत्तं
विडप्रीणनं गोपिकाजारताद्यम्।
भटप्रीणनं मल्लयुद्धादि भूम -
न्नहो सर्वमावर्जनं लौकिकानाम् ॥ **13** ॥

विधिज्ञप्रियं राजसूयादिवृत्तं
नयज्ञप्रियं दौत्यकृत्यादि यत्तत्।
प्रियो योगिनां विश्वरूपादियुक्त -
स्स योगात्मकः पार्थगीतोपदेशः ॥ **14** ॥

अहो कृष्ण ! या या विचित्रा कथा ते
जगन्नाथ सेयं जगत्तत्त्वविद्या।
इमां स्मारयंस्तत्तदंशोचितानां
गुरुस्त्वं मरुद्गेहवासी विभासि ॥ **15** ॥

जगत्प्राणरूपी गुरुर्मारुतो यो
जनानां जगत्यत्र चेष्टान्तरेषु।
तमास्थाय भोस्तत्त्वमस्यन्तरात्मा
स्फुटं मारुतागारवासी विभासि ॥ **16** ॥

॥ इति श्री गुरुवायुपुरेशभुजङ्गस्तोत्रम् समाप्तम् ॥